## १.१.१९. हरिदाससिद्धान्तवागीशः (१८७६-१९६१)

कविरयमाचार्यस्य मधुसूदनसरस्वतीत्यस्य प्रसिद्धे काश्यपवंशे १८७६ ईसवीयसंवत्सरे अक्टोबरमासस्य एकविंशतिदिनाङ्के वाङ्ग्लादेशस्य फरीदपुरजनपदे कोटालिपाडायाम् ऊनशियाग्रामे गङ्गाधरविद्यालङ्कार-विधुमुखीदेव्योः सुपुत्ररूपेण जातः। जीवानन्दविद्यासागरात् साहित्यशास्त्रमधिगम्य किशोरावस्थाया एव विविधविधासु काव्यानि प्रणिनाय। पञ्चदशवर्षवयसि एव स कंसवधनाटकं पूरितवान्, अष्टादशवर्षे च जानकीविक्रमनाटकम्। अनन्तरकाले स वेदवेदाङ्गपुराणदर्शनकाव्यनाटककलाप-व्याकरणादिषु नदीष्ण आसीत्। हरिदासो जीनकपुर-नरेशस्य टोले प्राध्यापक आसीत्। तस्य नाटकेषु हिन्दुत्वाभिमानस्य राष्ट्रियपुनरुत्थानस्य भावाः प्रबलाः सन्ति। रङ्गमञ्चदृष्ट्या नितरां सफलानि अस्य सर्वाणि नाटकानि बहुवारं मञ्चस्थीकृतानि सन्ति। युगोपयोगी सरल ओजःस्वी च गद्यविन्यासस्तस्य भाषाप्रवाहं प्रवाहयति सुखपाठ्यतां च विदधाति। संस्कृते स्वीययोगदानार्थं स पूर्ववङ्गसारस्वतसमाजेन 'साङ्ख्यरत्नपुराणशास्त्री', 'विद्यावागीश' इत्येताभ्यामुपाधिभ्यां सभाजितः। ब्रिटिशसर्वकारेण (१९३३)

'महामहोपाध्यायोपाधिः' भारतसर्वकारेण (१९६०) 'पद्मभूषणोपाधि'श्च प्रदत्तौ। तस्य सारस्वतसाधनया स भारताचार्य-महाकवि-रवीन्द्रपुरस्कारादिभिः सभाजितः। संस्कृतमौलिककृतीः विहाय स काव्यशास्त्रे स्मृतिशास्त्रे अपि ग्रन्थान् प्रणीतवान्, महाभारतस्य भारतकौमुद्यां टीकां टीकितवान्। कवेरस्य रचनाविश्वमेवमस्ति-

★ महाकाव्यम्- रुक्मिणीहरणम्;
★ खण्डकाव्यानि- वियोगवैभवम्, शङ्करसम्भवम्, विद्यावित्तविवादः;
★ नाटकानि- कंसवधम्, जानकीविक्रमम्, वङ्गीयप्रतापम्, मेवारप्रतापम्, शिवाजिचरितम्, विराजसरोजिनी;
★ उपन्यासः- सरला (पारिवारिकं सामाजिकं च वस्तु आधारीकृत्य);
★ शास्त्रम्- काव्यकौमुदी, स्मृतिचिन्तामणिः, वैदिकविवादमीमांसा। एतद्विहाय नैके वङ्गीयग्रन्था अपि सन्ति।

मिवारप्रतापम्-सम्राज आकवरस्य विरुद्धं मेवारस्य राज्ञः प्रतापसिंहस्य(१५७२-१५९७) देशप्रेमोज्वलं कथावस्तु उपजीव्य षडङ्कं नाटकमिदं प्रणीतं(१९४५) हरिदाससिद्धान्तवागीशेन प्राच्यवाणीसंस्थया उत्तरकलिकातायां ष्टारथिएटर्-द्वारेण प्रदर्शितम्। अत्र राजपुतानां पराक्रमं देशभक्तिं च निपुणतया नाटककारः प्रादर्शयत्।

'प्रतिज्ञा' इति प्रथमे अङ्के अकवरस्य सेनापतिः मानसिंहः अकवर-प्रतापयोः समाधानं विधातुमागत्य असम्मानितः सन् प्रतिज्ञां करोति-

यद्यमुष्य प्रतीकारं न कुर्य्यां वीर्य्यवानपि।
तदाम्बरं न यास्यामि यास्याम्यम्बरतां पुनः।[40]

तदनु राणाप्रतापः स्वभिल्लसैन्यैः सह प्रतिज्ञां गृहीतवान्- मोगलानां विताडनं यावन्न भवति, तावत् सर्वविधसुखं त्यक्त्वा साधारणजीवनं यापयितुम्। तदनुसारेण अङ्कस्य नाम प्रतिज्ञा इति। 'कमलाकौशल'मिति द्वितीयेऽङ्के आकवरस्य सभाकविः पृथ्वीराज आदिष्टः- सुन्दरीं स्वपत्नीं कमलां साधारणमहिलोत्सवे आनेतुम्। परन्तु तत्र कमलायाः सन्देहोऽभवत्। सा स्वकौशलेन प्रतिज्ञां पालयित्वा आत्मानं संरक्षितुं शक्ता जाता। 'मिवारप्रयाण'मिति तृतीयेऽङ्के सैन्यैः सह मानसिंहस्य तथा अकवरज्येष्ठपुत्रस्य सेलीमस्य मेवारगमनं वर्णितम्।

[40] १.१५, पृ.१०

'प्रतापपराजय' इति चतुर्थेऽङ्के मोगलैः सह राजपुतानां भीषणं युद्धं वर्णितम्। स्वामिभक्त्या झालपतिः कथं स्वात्मानं पणीकृत्य प्रतापस्य राजच्छत्रं धृत्वा मोगलान् लक्ष्यभ्रष्टान् कृत्वा प्रतापस्य पलायने मार्गं कल्पितवान्, भ्राता शक्तसिंहः प्रतापस्य दले आगतवान्, हल्दीघट्टयुद्धक्षेत्रात् स्वामिन आत्मरक्षणे प्रभुभक्तोऽश्वः चेतकः स्वान्तिमश्वासं निःश्वसन् कथं सहयोगं कृतवान्, प्रतापस्य मनोव्यथा, शक्तस्य बोधनमित्यादि सर्वमत्र वर्णितमिति नाटकस्य मुख्यो दीर्घश्चाङ्कोऽयमेव वर्तते। 'वनवास' इति पञ्चमेऽङ्के स्वराज्ये स्वपरिवारपरिपालनाय राणा सर्वं कष्टं साहं साहं कथं वने अटाट्यते इति वर्णितम्। भोजनं विना तस्य कन्याया इन्दिराया दुरवस्थां पश्यन् नितरां दिङ्मूढः स्वसम्मानमविगणय्य सः अकवरसमीपे प्रस्तावं प्रेषयितुं चिन्तितवान्। षष्ठेऽङ्के अकवरः प्रतापस्य सन्धिपत्रं प्राप्नोति। तेन वीकानेरस्य राथोरपृथ्वीराजः संस्कृतेन श्लोकं विलिख्य सम्राजः अनुमत्या प्रतापाय प्रेषयति। तेन नितरां प्रचोदितो वीरप्रतापः सहसा मन्त्रिणां साहाय्येन द्वात्रिंशद्दुर्गाणि अधिकरोति। तस्य विजयगौरववर्णनेन प्रजाभ्यो हार्दशुभाशयप्रापणेन च नाटकं समाप्तं भवति। शताधिकपुटेषु परिव्याप्तेऽस्मिन् नाटके ऐतिहासिकं विवरणं यथावत् सुरक्षितं वर्तते इति विशेषः।

**शिवाजीचरितम्**-इदं दशाङ्कं महानाटकं वागीशेन 1349 वङ्गाब्दे (1943ई.) रचितम्। यद्यपि नाटककारेण निवेदने निवेदितं यन् नाट्ये वस्तुनः परिवर्तनमपि भवति, तथापि अत्र ऐतिहासिकं तथ्यं सम्यगनुसृतं वर्तते। यथा- "किन्तु प्रायेणैव यथायथमितिहासमनुसरता वृत्तान्तपरिवृत्तिमकुर्वता पात्रमात्रञ्च कल्पयता नाटकीयलक्षणादीनि च परिरक्षता नाटकमिदं मया निरमायि। ...अथ केचन विदेशीया देशीयाश्च इतिहासलेखकाः प्रमादाद्वा रुचिवैचित्र्याद्वा शिवानन्दसिंहं दस्युतया चित्रयामासुः, निरपेक्षचित्ताः प्रकृतदर्शिनश्च वयं ...तादृशं चित्रणं ...परिहृतवन्तः।..."(निवेदनम)

'सङ्घसङ्घटनम्' इति प्रथमाङ्के शिवाजी मित्रेभ्यो बोधयति- शास्त्रपठनेन यौवनं न क्षपयित्वा शस्त्रधारणेन मातृभूमेः रक्षा करणीया इति। अन्ततः सर्वे तदर्थं सङ्घाबद्धा भवन्ति। 'तोरणदुर्गाधिकार' इति द्वितीयेऽङ्के छद्मधारणेन कथं तैः तोरणदुर्गः अधिकृत इति कथा वर्णिता। 'शाहनाथवन्दीकरण'मिति तृतीयेऽङ्के विजापुरशासको नादिरशाहा तोरणदुर्गे शिवाजीकृत्यं संवीक्ष्य तस्य पितरं शाहनाथं वन्दीकृतवान्। चतुर्थेऽङ्के वन्दिनः पितुः विनिमयेन शिवाजी विभिन्नदुर्गेषु

वन्दिग्राहेण गृहीतान् सैन्यान् मोचितवान्। पञ्चमेऽङ्के विजापुरसुलतानेन प्रेषितस्य सेनानायकस्य आफज़लस्योपरि शिवाजेर्विजयो वर्णितः। सुलतानेन सह तस्य साक्षात्कारस्य प्रस्तावे स दुरभिसन्धिमनुमितवान्। 'पुण्यपत्तनविजय'नामके षष्ठेऽङ्के भास्करशर्मणः कौशलेन शिवाजी कथमन्तः प्रविश्य विजयं प्राप्तवान् इति वर्णितम्। सप्तमेऽङ्के औरङ्गजेवस्य निमन्त्रणं प्राप्य, अम्बरराजेन राजाजयसिंहेन स्वसुरक्षां पुष्टीकृत्य गतोऽपि शिवाजी राजदरवारे अपमाननं लभते। तं वन्दीकृत्य कारागारे न्यक्षिप्यद् औरङ्गजेवः। अस्वस्थस्य शिवाजेः स्वास्थ्यलाभाय ब्राह्मणेभ्यो वितीर्णाय प्रदत्ते फलमिष्टादिकण्डोले निलीय शिवाजी निर्गच्छति इति अष्टमेऽङ्के वर्णितम्। परस्मिन्नङ्के मुगलपक्षतो नियुक्तसेनाधिकारिणो मुर्दनसिंहस्योपरि विजयं प्राप्य स्वाधीनमरहट्टाशासको जात इति तस्य अङ्कस्य नाम 'विजयः'। अन्तिमे औरङ्गजेवस्तं राजरूपेण स्वीकरोति। सर्वे बान्धवाः, प्रजाः, राजपुरोहितः, गुरुः रामदासः चोपस्थाय रायदुर्गे तस्य राज्याभिषेके आनन्दं प्राप्य आशीर्वादान् वितरन्ति। तदनु नायकः स्वयं भरतवाक्यमुच्चारयति। अपि चात्र 'शिवानन्दराज्याभिषेक' इति दशमोऽङ्कः समाप्तो भवति। सर्वत्र ऐतिहासिकं तथ्यं यथायथं विवृणोति नाट्यकारः।

वङ्गीयप्रतापम्-वाङ्ग्लादेशस्य जेशोरो इत्यत्र प्रसिद्धस्य ऐतिहासिक-नायकस्य प्रतापादित्यस्य वीरत्वपूर्णां कथानिकामुपजीव्य हरिदाससिद्धान्तवागीशः 1918 संवत्सरे "वङ्गीयप्रताप"मिति अष्टाङ्कं नाटकमलिखत्। लेखको विश्वस्तभावेन इतिहासमन्वसरदिति प्रतिजानीते- "...मया तु सम्भवति सत्याश्रयणे मिथ्याश्रयणमन्याय्यमिति ...इतिहासमनुसरतैव नाटकमिदं निरमायि।" इदं नाटकं बहुवारं कलिकतायां, कवेः जन्मस्थाने उनाशियाग्रामे, आसामे गौरीपुरे च सफलतया मञ्चस्थं जातमिति ज्ञायते। अस्य निर्दिष्टभागो विभिन्नविश्वविद्यालयेषु पाठ्यक्रमे पाठ्यरूपेण चितो वर्तते।

अत्र 'सहायलाभ' इति प्रथमेऽङ्के वङ्गीययुवा शङ्करचक्रवर्ती जशोरोराजस्य विक्रमादित्यस्य पुत्रेण प्रतापादित्येन मिलित्वा परस्परमालप्य देशात् मुगलानां विताडनाय पणं करोति। द्वितीयेऽङ्के साधारणसरलव्यक्तित्वसम्पन्नस्य तथा अचलभक्तिभावपूरितस्य विक्रमादित्यस्य, तस्य भ्रात्रीयस्य वसन्तरायस्य कथा वर्णिता, ययोः अन्धश्रद्धा वर्तते प्रतापादित्ये। 'कल्याणीपरित्राण'मिति तृतीये अङ्के मुगलसैन्यानां कवलाच्छङ्करस्य सुन्दर्याः पत्न्या मोचनं वर्णितम्। प्रतापादित्यस्य

प्रतापं विज्ञाय तं जशोरोराजारूपेण मुगलशासकः अकबरः अनुमन्यते। तेन 'राज्यलाभ' इति अङ्कस्य नाम सफलं भवति। 'वङ्गेशविजय' इति पञ्चमे अङ्के प्रतापादित्यो वङ्गनवावाद् विजयं प्राप्तवान् इति ज्ञायते। षष्ठे अङ्के धूमघाट इति नवराजधान्यां प्रजा मिलिता भवन्ति प्रतापादित्यस्य राज्याभिषेकं द्रष्टुम्। 'दुर्जननिधनम् ' इति सप्तमेऽङ्के नाटककारेण मुगलपक्षतः मानसिंहपुत्रेण सह प्रतापादित्यस्य पुत्रस्य उदयादित्यस्य युद्धे विजयो वर्णितः। अन्तिमे घट्टे 'प्रतापविजय' इति अष्टमे अङ्के सहसा मुगलवाहिनीमाक्रम्य प्रतापादित्यो मानसिंहस्य विचारान् नाशयित्वा विजयं प्राप्य भरतवाक्यमुच्चारयति।

दिवसत्रयव्यापिनि युद्धे दिनद्वयं यावद् विजयं प्राप्य प्रतापादित्यः अन्तिमे परिजितः सन् वन्दीभावेन दिल्लीनयनसमये मृतः। परन्तु नाटककारो नायकस्य गौरवं संरक्ष्य प्रथमदिवसस्य युद्धान्ते नाटकं समाप्य ऐतिहासिकं तथ्यं परिशिष्टे योजयति।

हरिदासस्य मातृभूमिस्तवनमनन्यमप्रतिद्वन्द्वि च वर्तते। तात्कालिकम् इतिहासं देशात्मबोधकानि काव्यानि किम्बदन्तिपुरुषान् च अधीत्य नितरां प्रचोदितोऽयमिति प्रतिभाति। अतः तस्य नाटकत्रयम् ऐतिहासिककथावस्तुभिर्देशभक्तचरित्रैश्च सुगुम्फितं सुचित्रितं सुवर्णितञ्च वर्तते। सर्वत्र मुगलशासनविरुद्धं कविना नायकानां सङ्घर्षः रेखाङ्कितो वर्तते। तेन आधुनिकसंस्कृतसाहित्येतिहासे हरिदाससिद्धान्तवागीशस्य नाम अक्षरं स्थास्यतीति निश्चप्रचम्। तात्कालिकाः सामाजिका अपि तेन नितरां प्रभाविता एव।

मिवारप्रतापं नाटकं निश्चयेन ऐतिहासिकनाटकस्य उत्तममुदाहरणं वर्तते। नाटककारो नायकस्य देशभक्तिगुणान् प्रगुणीकरोति उक्तप्रत्युक्ति-उद्बोधन-अलङ्करणादिभिर्विषय-कथा-काव्येतिहासमाध्यमैश्च। अत्र नाटकलक्षणानि सम्यक् सङ्गच्छन्ते। सुप्रसिद्धकथावस्तुना गुम्फितेऽस्मिन् नाटके धीरोदात्तो उत्तमगुणसम्पन्नो नायको न्यायाय सत्याय च सदा सङ्घर्षरतो वर्तते। वीररसः शृङ्गाररसो वा अङ्गी रसो वर्तते। अपि च नान्दी-प्रस्तावना-अर्थप्रकृत्यादिभिः नाटकलक्षणैरपि इदं समृद्धं वर्तते। नायिका-विदूषक-विट-पीठमर्दादिभिः रहितमिदं नाटकं नाटकगुणैर्न्यूनं न वर्तते। नान्द्यां शिवः स्तुतः। साहित्यदर्पणानुसारमत्र उद्घात्यकरूपा प्रस्तावना वर्तते। सूत्रधारेण सम्मानार्थे उच्चारितो मानः शब्दः पुरोहितस्य सुप्रभदेवस्य सुक्षत्रियादिशब्दैः सम्भृतो मानसिंहस्य पर्याये परिवर्तितः। एवं प्रथमेऽङ्के अर्थोपक्षेपकस्य चतुर्थेऽङ्के विष्कम्भकस्य प्रयोगो दृश्यते अत्र।

ओजोगुणेन वीररस उद्दीपितः। सैन्यानां युद्धेन, खड्गाद्यस्त्राणां झङ्कारेण, युद्धभूमेर्वर्णनेन च नाटकस्य परिवेशः सुष्ठु निरूपितः। सत्यमुक्तं समीक्षकया ऋताचट्टोपाध्यायया-

"Thus all the three historical plays of 'Haridasa' are primarily based on historical facts; the major characters of the plays are hisrorical figures; the main incidents are easily traceable in history- still no where the dramatic action is impeded by crude insipid history. The outstanding juxtaposition of tradition and innovation; poetic talent and dramatic genius seems to be in the higjest form in all the aforesaid three plays of Siddhantavagisa. Moreover, in spite of their being historical plays covering a very wide canvas of medieval Indian history studded with historical incidents centred round the glorious deeds of the luminious historical figures, their stage success has also been proved. The execution and the development of the plots are so splendidly perfect that not a single incident- whether historical or imaginary- seems to be superfluous.

Haridasa, however, has been and will ever be enshrined in the hearts of the connoisseurs as the superb executor of the historical plays- not very common in the whole range of Sanskrit literature. Thus all the three historical plays are quite adequately and deservedly eligible to claim foe him a great, unique and unshakable position, as a dramatist in the history of Modern Sanskrit Literature, which is all his own.[41]

### १.१.२०. प्रसन्नकुमारकाव्यतीर्थः(१८७६-१९४१)

श्रीमत्प्रसन्नकुमार! कविवर! तव लेखनीखनीजन्यः।
सुवर्णघटितकराङ्कः कं हि रञ्जयन् नरञ्जयति॥[42]

कृपासिन्धुतर्कवागीशस्य चतुर्थपुत्रस्य मृत्युञ्जयस्य तथा ब्रह्ममयीदेव्याः

[41] 20th Cen. San. Lit., p. 60।

[42] श्रीजीवन्यायतीर्थस्य।